विच्छेदः, पुं, ( वि+छिद्+घञ् । ) वियोगः । विरहः । भेदः । यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ।
"कान्तायाः कान्तविच्छेदो मरणादति-
रिच्यते ॥"
(लोपः । यथा, रघुवंशे । १ । ६६ ।
"नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः ।
न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ॥")

विच्युतः, त्रि, विगतः । विपूर्व्वच्युधातोः क्तप्रत्ययेन निष्पन्नः । विचरितः । विपूर्व्वच्युतधातोः क्तप्रत्ययेन निष्पन्नः ॥ (यथा, भागवते ।८।१२।२१।

विच्युतिः, स्त्री, ( वि+च्यु+क्तिन् । ) वियोगः । यथा,—
"सोऽपि वैश्यस्ततो ज्ञानं वव्रे निर्व्विण्णमानसः ।
ममेत्यहमिति प्राज्ञः सङ्गविच्युतिकारकम् ॥"
इति मार्कण्डेयपुराणे देवीमाहात्म्यम् ॥

विज, इर् लि ञ औ वेके । इति कविकल्पद्रुमः ॥ ( जुहो०-उभ०-अक०-अनिट् । ) वेक इति विचिर्लि धौ ञ पृथक्के इत्यस्य घञि रूपम् । इर्, अविजत् अवैक्षीत् । लि ञ, वेवेक्ति वेविक्ते मूर्खात् पण्डितः पृथक् स्यादित्यर्थः । औ, वेक्ता । इति दुर्गादासः ॥

विज, ई ओ ध भीकम्पे । इति कविकल्पद्रुमः ॥ ( रुधा०-पर०-अक०-सेट् । अनिड्निष्ठः । ) ई ओ, विग्नः । ध, विनक्ति । इति दुर्गादासः ॥

विज, ङ श ई ओ भीकम्पे । इति कविकल्पद्रुमः ॥ (तुदा०-आत्म०-अक०-सेट् । निष्ठायामनिट् ।) ङ श, विजते । ई ओ, विग्नः । द्वावर्णौ । इति दुर्गादासः ॥

विजनः, त्रि, ( विगतो जनो यस्मात् ।) निर्ज्जनः । तत्पर्य्यायः । विविक्तः २ छन्नः ३ निःशलाकः ४ रहः ५ उपांशु ६ । इत्यमरः ॥ (यथा, महाभारते । १ । १५२ । १५ ।
"ततो भीमो वनं घोरं प्रविश्य विजनं महत् ।
न्यग्रोधं विपुलच्छायं रमणीयं ददर्श ह ॥")

विजननं, क्ली, ( वि+जन+ल्युट् । ) प्रसवः । इति हेमचन्द्रः ॥

विजपिलं, क्ली, पङ्कः । यथा,—
"पिच्छलं स्यात् विजपिलं पङ्कः शादो निष-
द्वरः ।"
इति हलायुधः ॥

विजन्मा, [न्] त्रि, (विरुद्धं जन्म यस्य ।) जारजः । विरुद्धजन्मविशिष्टः । इति लोकप्रसिद्धः ॥ ( पुं, वर्णसङ्करजातिविशेषः । यथा, मनुः । १० । २३ ।
"वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य्य एव च ।
कारुषश्च विजन्मा च मैत्रः सात्वत एव च ॥")

विजयः, पुं, ( वि+जि+भावे अच् । ) जयः । इत्यमरः ॥ ( यथा, मनौ । १० । ११९ ।
"स्वधर्म्मो विजयस्तस्य नाहवे स्यात् पराङ्मुखः ।
शस्त्रेण वैश्यान् रक्षित्वा धर्म्म्यमाहारयेद्बलिम् ॥")
अर्जुनः । इति मेदिनी । ये, १०३ ॥ ( यथा, महाभारते । ४ । ४२ । १४ ।
"अभिप्रयामि संग्रामे यदहं युद्धदुर्म्मदान् ।
नाजित्वा विनिवर्त्तामि तेन मां विजयं विदुः ॥"
यथा च विख्यातविजयनाटके । २ ।
"इतो भीमः क्रूरो नृपतिसहजन्मानमवधीत्
इतः क्रुद्धो वत्सं व्यथयति शरौघैर्विजयः ।
न मे चेतःस्थैर्य्यं दृढयति सखे कुत्र गमनं
विधेयं तद्ब्रूहि त्वमसि सदसद्वाक्यविषयः ॥")
हन्तार्हन्पिता । जिनवलदेवः । विमानः । इति हेमचन्द्रः ॥ यमः । इति शब्दचन्द्रिका ॥ कल्किपुत्रः । यथा,—
"ततः कल्केश्च पद्मायां जयो विजय एव च ।
द्वौ पुत्रौ जनयामास लोकख्यातौ महाबलौ ॥"
इति श्रीकल्किपुराणे १३ अध्यायः ॥
भैरववंशीयकल्पराजपुत्रः । स काशीराजः खाण्डववनकर्त्ता च । यथा,—
"सुमतेरभवत् कल्पः सुतः सत्यस्य डिण्डिमः ।
विरूपस्याभवद्गाधिर्गाधेर्म्मित्रोऽभवत् सुतः ॥
तेषां कल्पोऽभवद्राजा कल्पात्तु विजयोऽभवत् ॥
यो विजित्य क्षितिं सर्व्वां पार्थिवान् भूरितेजसा ।
शक्रस्यानुमते चक्रे खाण्डवं शतयोजनम् ॥
यत् सव्यसाची ह्यदहत् पाण्डुपुत्रः प्रताप-
वान् ।
आवहन् परमां प्रीतिं ज्वलनस्य महात्मनः ॥"
इति कालिकापुराणे भैरववंशानुकीर्त्तनम् ९० अध्यायः ॥ विष्णुचरविशेषः । यथा । विष्णुचराश्चण्डप्रचण्डजयविजयादयः । इति पुंलिङ्गसंग्रहे भरतः ॥

विजयकुञ्जरः, पुं, ( विजयाय यः कुञ्जरः ।) राजवाह्यहस्ती । इति त्रिकाण्डशेषः ॥

विजयच्छन्दः, पुं, ( विजयस्य छन्दो यस्मात् । ) पञ्चशतमौक्तिकहारः । इति हेमचन्द्रः ॥ ( यथा, वृहत्संहितायाम् । ८१ । ३१ ।
"सुरभूषणं लतानां सहस्रमष्टोत्तरं चतुर्हस्तम् ।
इन्द्रच्छन्दो नाम्ना विजयच्छन्दस्तदर्द्धेन ॥")

विजयनन्दनः, पुं, इक्ष्वाकुवंशजराजविशेषः । तत्पर्य्यायः । त्रयः २ । इति हेमचन्द्रः ॥

विजयमर्द्दलः, पुं, ( विजयाय मर्द्दलः । ) ढक्का । इति त्रिकाण्डशेषः ॥ जयढाक इति भाषा ॥

विजया, स्त्री, तिथिविशेषः । सा विजयादशमीति ख्याता । तत्कृत्यं दुर्गाशब्दे द्रष्टव्यम् । उमासखी । इति मेदिनी । ये, ४० ॥ सा तु गौतमकन्या । यथा,—
"समागतां सतीं दृष्ट्वा जयामेकामुवाच ह ।
किमर्थं विजया नागाज्जयन्ती चापराजिता ॥
सा देव्या वचनं श्रुत्वा उवाच परमेश्वरीम् ।
गता निमन्त्रिताः सर्व्वा मखे मातामहस्य ताः ।
समं पित्रा गौतमेन मात्रा चाप्यनुराधया ॥"
इति वामनपुराणे ४ अध्यायः ॥
कालिकापुराणे १७ अध्यायेऽप्येवम् ॥ * ॥ विश्वामित्रोपासितविद्याविशेषः । यथा,—
"विद्यामथैनं विजयां जयाञ्च
रक्षोगणं क्षिप्नुमविघ्नतात्मा ।
अध्यापिपत् गाधिसुतो यथाव-
न्निघातयिष्यन् युधि यातुधानान् ॥"
इति भट्टिः । २ । २१ ॥ * ॥
दुर्गा । इति हेमचन्द्रः ॥ तथा च ।
"विजित्य पद्मनामानं दैत्यराजं महाबलम् ।
विजया तेन सा देवी लोके चैवापराजिता ॥"
इति देवीपुराणे ४५ अध्यायः ॥ * ॥
यमभार्य्या । हरीतकी । इति जटाधरः ॥ वचा । इति रत्नमाला ॥ जयन्ती । शेफालिका । मञ्जिष्ठा । शमीभेदः । अग्निमन्थः । इति राजनिर्घण्टः ॥ मादकद्रव्यविशेषः । भाङ् इति सिद्धि इति च भाषा । तत्पर्य्यायः । त्रैलोक्यविजया २ भङ्गा ३ इन्द्राशनम् ४ जया ५ । इति शब्दचन्द्रिका ॥ वीरपत्रा ६ गञ्जा ७ चपला ८ अजया ९ आनन्दा १० हर्षिणी ११ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । वातकफापहत्वम् । संग्राहित्वम् । वाक्प्रदत्वम् । बल्यत्वम् । मेधाकारित्वम् । श्रेष्ठदीपनत्वञ्च । इति राजनिर्घण्टः ॥ अपि च ।
"भङ्गा गञ्जा मातुलानी मादिनी विजया
जया ।
भङ्गा कफहरी तिक्ता ग्राहिणी पाचनी लघुः ।
तीक्ष्णोष्णा पित्तला मोहमदवाग्वह्निवर्द्धिनी ॥"
इति भावप्रकाशः ॥
अन्यच्च ।
"शक्राशनं तु तीक्ष्णोष्णं मोहकृत् कुष्ठनाश-
नम् ।
बलमेधाग्निकृत् श्लेष्मदोषहारि रसायनम् ॥
जाता मन्दरमन्थनाज्जलनिधौ पीयूषरूपा पुरा
त्रैलोक्ये विजयप्रदेति विजया श्रीदेवराजप्रिया ।
लोकानां हितकाम्यया क्षितितले प्राप्ता नरैः
कामदा
सर्व्वातङ्कविनाशहर्षजननी यैः सेविता
सर्व्वदा ॥"
इति राजवल्लभः ॥ * ॥
अष्टमहाद्वादश्यन्तर्गतद्वादशीविशेषः । यथा,
अथ विजयाव्रतम् । ब्रह्मपुराणे ।
"यदा तु शुक्लद्वादश्यां नक्षत्रं श्रवणं भवेत् ।
तदा सा तु महापुण्या द्वादशी विजया स्मृता ॥
तस्यां स्नातः सर्व्वतीर्थे स्नातो भवति मानवः ।
संपूज्य वर्षपूजायाः सकलं फलमश्नुते ॥
एकजप्यात् सहस्रस्य जप्यस्याप्नोति सत् फलम् ।
दानं सहस्रगुणितं तथा वै विप्रभोजनम् ॥
होमस्तत्रोपवासश्च सहस्रगुणितो भवेत् ॥" * ॥
अथ व्रतविधिः ।
"आदौ गुरुं नमस्कृत्य ततः सङ्कल्पमाचरेत् ।
शरशार्ङ्गधरं देवं सौवर्णं रचयेत्तराम् ॥"
सङ्कल्पमन्त्रः ।
"द्वादश्याहं निराहारः स्थित्वाहमपरेऽहनि ।
भोक्ष्ये त्रिविक्रमानन्त शरणं मे भवाच्युत ॥
सोपवीतन्तु कलसं पूर्व्ववत् स्थापयेद्व्रती ।